मज्जा रसौजः पिशितञ्च दूष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥” * ॥

तस्य पूर्व्वरूपम् ।

“दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे तृट् स्वाद्वास्यञ्च जायते ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्या विशेषेऽपि तत्संयोगविशेषतः ।
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्पते ॥” * ॥

क्रमेण कफजानां दशानां लक्षणानि ।

“अच्छं बहुसितं शीतं निर्गन्धमुदकोपमम् ।
मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम् ॥
इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ।
सान्द्रो भवेत् पर्य्युषितं सान्द्रमेहेन मेहति ॥
सुरामेही सुरातुल्यमुपर्य्यच्छमधोघनम् ।
संहृष्टलोमा पिष्टेन पिष्टवद्बहुलं सितम् ॥
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ।
मूर्त्ताणून् सिकतामेही सिकतारूपिणो मलान् ॥
शीतमेही सुबहुशो मधुरं भृशशीतलम् ।
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥”

क्रमेण पित्तजानां षण्णां लक्षणानि ।

“गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥
नीलमेहेन नीलाभं कालमेही मसीनिभम् ।
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् ॥
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ।
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥” * ॥

क्रमेण वातजानां चतुर्णां लक्षणानि ।

“वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः ।
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ॥
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्ज्जितम् ।
सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति ॥” * ॥

कफजादिभेदेन तेषामुपद्रवाः ।

“अविपाकोऽरुचिश्छर्द्दिर्निद्राकासः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥
वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाम्लिका मूर्च्छा विड्भेदाः पित्तजन्मनाम् ॥
वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः ।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥”

अरिष्टलक्षणम् ।

“यथोक्तोपद्रवारिष्टमतिप्रसुतमेव च ।
पिड़कापीड़ितं गाढ़ं प्रमेहो हन्ति मानवम् ॥
जातः प्रमेही मधुमेहिनो वा
न साध्यरोगः स हि बीजदोषात् ।
ये चापि केचित् कुलजा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥ * ॥
सर्व्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि ॥
मधुमेहे मधुसमं जायते स किल द्विधा ।
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ॥
आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् ।
क्षीणः क्षणात् क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम् ॥
मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।
सर्व्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥ * ॥
प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम् ।
विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥”
इति माधवकरः ॥

अस्य दशविधपिड़काः पिड़काशब्दे द्रष्टव्याः ॥

अथ प्रमेहस्य चिकित्सा ।

“श्यामाककोद्रवोद्दाला गोधूमश्चणकाढकी ।
कुलत्थाः कथिता भोज्ये पुराणा मेहिनां हिताः ॥
यवान्नविकृतिर्मुद्गाः शालयः षष्टिकास्तथा ।
तथा तिक्तानि शाकानि जाङ्गलाः पक्षिणो मृगाः ॥
उद्दालो वनकोद्रवः ॥ * ॥
प्रमेही गुड़दुग्धाम्लतैलतक्रसुराः सदा ।
आम्लेक्षुरसपिष्टान्नानूपमांसानि वर्ज्जयेत् ॥ * ॥
मुस्ताहरीतकीलोध्रैः कट्फलेन कृतं हृतम् ।
पीतं मधुयुतं हन्ति प्रमेहं कफहेतुकम् ॥ * ॥
पटोलनिम्बामलकाम्रतानां
पिबेत् कषायं मधुना समेतम् ।
उशीरलोध्रार्ज्जुनचन्दनानां
तथा पिबेत् पित्तनिमित्तमेही ॥ * ॥
पाठाशिरीषदुःस्पर्शाजातिविल्वकिंशुकैः ।
कपित्थस्य भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥
पाठादिभिः सहितस्य कपित्थस्य क्वाथम् ।
गुड़ूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित् ।
हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥
मधुना त्रैफलं चूर्णमथवाश्मजतूद्भवम् ।
लौहजं वाभयोत्थं वा लिह्यान्मेहनिवृत्तये ॥ * ॥
चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्ती पत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विड़ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षं हतलौहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभातिविख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्त्रयोदश ।
अण्डवृद्धिं पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नाद्गुटिकामिमाम् ।
प्राप्तवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥
चन्द्रप्रभाकचूर इति लोके । व्योषं त्रिकटु । द्वौ क्षारौ सर्जिकायवक्षारौ । लवणत्रयम् । सैन्धवं रुचकञ्चापि विड़ञ्च लवणत्रयमिति चन्द्रप्रभादिर्वटिका ॥ * ॥
प्रमेहपिड़कानां प्राक् कार्य्यं रक्तविमोचनम् ।
पाटनञ्च विपक्वानां ततो व्रणविधिः स्मृतः ॥”
इति भावप्रकाशः ॥

(अस्य सकारणपूर्व्वरूपसम्प्राप्तयस्तथोपद्रवश्च । यथा,—

“त्रिदोषकोपननिमित्ता विंशतिप्रमेहविकाराश्चापरेऽपरिसङ्ख्येयाः । तत्र यथा त्रिदोषप्रकोपप्रमेहानभिनिर्व्वर्त्तयति तथानुव्याख्यास्यामः ।

इह खलु निदानदोषदूष्यविशेषेभ्यो विकाराणां विघातभावाभावप्रतिविशेषा भवन्ति । यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्त्यथवाप्रकर्षादबलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः । चिराद्वाप्यभिनिर्व्वर्त्तन्ते तनवो भवन्त्यथवाप्ययथोक्तसर्व्वलिङ्गा विपर्य्ययेण विपरीता इति सर्व्वविकारविघातभावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुरुक्तः ।

तत्र इमे निदानादि विशेषाः श्लेष्मनिमित्तानां प्रमेहाणामाश्वभिनिर्वृत्तिकरास्तद्यथा हायनकयवचीनकोद्दालकनैषधोत्कटमुकुन्दकमहाव्रीहिप्रमोदकसुगन्धकानां नवानामतिवेलमतिप्रमाणेनोपयोगः । तथा सर्पिष्मतां नवहरेणुमाषसूपानां ग्राम्यानूपौदकानां मांसानां शाकतिलपललपिष्टान्नपायसकृशरविलेपीक्षुविकाराणां क्षीरमन्दकदधिद्रवमधुरतरुणप्रायाणामुपयोगो मृजाव्यायामवर्ज्जनस्वप्नशयनासनप्रसङ्गो यश्च कश्चिदविधिरन्योऽपि श्लेष्ममेदोमूत्रसञ्जननः सर्व्वः सनिदानविशेषः ।

बहुद्रवश्लेष्मा दोषविशेषः बहुबद्धं मेदः मांसञ्च शरीरक्लेदः शुक्रं शोणितञ्च वसामज्जालसीका रसश्चौजः सङ्ख्याता इति दूष्यविशेषाः ।

त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्माप्रकोपमापद्यते प्रागतिभूयस्त्वात् । स प्रकुपितः क्षिप्रमेव शरीरे विसृतिं लभते । शरीरशैथिल्यात् स विसर्पं शरीरे मेदसैवादितो मिश्रीभावं गच्छति । मेदसश्चैव बहुबद्धत्वान्मेदसश्च गुणानां गुणैः समानगुणभूयिष्ठत्वात् स मेदसा मिश्रीभावं गच्छन् दूषयत्येतद्विकृतत्वात् स विकृतो दुष्टेन मेदसोपहितः शरीरक्लेदमांसाभ्यां संसर्गं गच्छति । क्लेदमांसयोरतिप्रमाणाभिवृद्धत्वात् स मांसे मांसप्रदोषात् पूतिमांसपिड़काः शराविका कच्छपिकाद्याः सञ्जनयत्यप्रकृतिभूतत्वात् शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति । मूत्रवहानां स्रोतसां वङ्क्षणवस्तिप्रभवानां मेदःक्लेदोपहितानि गुरूणि मुखान्यासाद्य प्रतिरुध्यते । ततः स्थैर्य्यं साध्यतां वा जनयति प्रकृतिविकृतिभूतत्वात् ।

शरीरक्लेदस्तु श्लेष्ममेदोमिश्रः प्रविशन् मूत्राशये मूत्रत्वमापद्यमानः श्लैष्मिकैरेभिर्दशभिर्गुणैरुपसृज्यते वैषम्यहानिवृद्धियुक्तैस्तद्यथा श्वेतशीतमूर्त्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्दैस्तत्र येन गुणेनैकेनानेकेन वा भूयस्तरमुप-